# शङ्करविजयस्य निर्घण्टपत्रम्।


| प्रकरणानि। | विषयाः। | पृष्ठाङ्काः। |
|---|---|---|
| १ | मङ्गलाचरणशास्त्रोपक्रमणिका .. .. .. .. .. | १ |
| २ | शङ्कराचार्य्यस्य शङ्करावतारस्य प्रादुर्भावकथारम्भः | २ |
| ३ | अद्वैतस्वरूपकथनारम्भः .. .. .. .. | ११ |
| ४ | शैवमतनिराकरणाम्भः .. .. .. .. .. .. | १९ |
| ५ | शिवमतैकदेशिमतनिराकरणारम्भः .. .. | ३७ |
| ६ | भागवतमतनिराकरणारम्भः.. .. .. .. .. | ५१ |
| ७ | वैष्णवमतनिराकरणारम्भः .. .. .. .. | ५९ |
| ८ | पञ्चरात्रागमनिराकरणारम्भः .. .. .. | ६४ |
| ९ | वैखानसमतनिराकरणारम्भः .. .. .. .. .. | ७० |
| १० | कर्म्महीनवैष्णवमतनिराकरणारम्भः.. .. .. | ७८ |
| ११ | हैरण्यगर्भमतनिराकरणारम्भः .. .. .. | ८१ |
| १२ | अग्निवादिमतनिराकरणारम्भः .. .. .. | ९० |
| १३ | सौरमतनिराकरणारम्भः .. .. .. .. | ९४ |
| १४ | गुरुस्तुतिः .. .. .. .. .. .. .. .. | १०२ |
| १५ | महागणपतिमतनिराकरणारम्भः.. .. .. | १०६ |
| १६ | हरिद्रागणपतिमतनिराकरणारम्भः .. .. | १११ |
| १७ | उच्छिष्टगणपतिमतनिराकरणारम्भः .. .. | ११४ |
| १८ | नवनीतस्वर्णसन्तानगणपतिमतनिराकरणारम्भः | ११९ |
| १९ | शक्तिमतनिराकरणारम्भः .. .. .. .. | १२२ |
| २० | महालक्ष्मीमतनिराकरणारम्भः .. .. .. | १२७ |
| २१ | वागदेवतामतनिराकरणारम्भः .. .. .. | १३० |

| पृष्ठाङ्काः | पङ्क्त्यङ्काः। | अशुद्धानि। | शुद्धानि। |
|---|---|---|---|
| १६० | २ | सत्यद्दवं | सत्यत्तनं |
| १६० | १० | चिकालनाद्यन्तु | त्रिकालनाद्यन्त |
| १६१ | ७ | म्टढतम | मूढतम |
| १६१ | १६ | स्ववाहनारूढस्य | स्ववाहनारूढस्य |
| १६२ | ३ | स्वन्तर्गत | स्वान्तर्गत |
| १६२ | ४ | श्यामशवलादयो | श्यावशवलादयो |
| १६४ | ४ | वऊप्रपद्यैः | बऊप्रपन्नैः |
| १६४ | ५ | वियुलतराय | वियुलतरायां |
| १६४ | ७ | मात्रेशलच्य | मात्रलच्यां |
| १६४ | ८ | परमात्मानमीच्य | परमात्मानं समीच्य |
| १६५ | २ | वकुण्ठ | वैकुण्ठे |
| १६५ | ८ | प्रसादलवं | प्रसादलवो |
| १६५ | ८ | मित्यनुज्ञा | इत्यनुज्ञा |
| १६७ | ३ | पुस्पधनु | पुष्पधनु |
| १६७ | ९ | कृत्वा मोक्षप्रदोऽपि | कृत्वा स्थिताव मोक्षप्रदोऽपि |
| १६७ | १२ | शीकृत | वशीकृत |
| १६८ | ३ | पुस्पधनु | पुष्पधनु |
| १६८ | १५ | वशासम्भवात् | वशीकरणाद्यसम्भवात |
| १६८ | १६ | यदुच्येत | यद्युच्येत |
| १७० | ९ | दरद्रादि | दरिद्रादि |
| १७० | ११ | मूलकत्वं | मूलत्वं |
| १७१ | ४ | नामयर्च्ति | नामकयच्ति |
| १७१ | ८ | सङ्कः कृत | सङ्कृत |

## शङ्कर विजये

### ऊनविंश प्रकरणं।

---

ततः श्रीशङ्कराचार्य्यः भवानीनगरं प्राप। (१) तस्मादिलां पादपद्मै र्विचित्रां (२) कुर्वन् पलाशोत्तमाङ्गार्च्चिताङ्घ्रिद्वयां तां सकलपूर्णरूपां सशिष्योऽभजत् सः। एवं सकलयतिगुरुः श्रीशङ्कराचार्य्यः समस्तशिष्याचरितपूजाङ्गीकारविलसत्पाद-कमलः सर्व्वदेवार्च्चितो गुरुरिव प्रकाशमानमूर्त्तिः तत्र मासका-लमतिष्ठत्। तत्रस्थाः परमगुरुं (३) यतिशिरोमणिं शिरोभि-रभिवाद्य (४) सविनया इदमूचुः। स्वामिन्नस्मन्मतमति विचि-त्रतरं शृणु। भगवती (५) किल महाशम्भुशक्तिः प्रपञ्चमूल-कारणं गुणातीतवृत्तिश्च (६) तन्मायावशात् महत्तत्त्वादिजग-

---

१ ततः श्रीशङ्कराचार्य्यस्तुलाभवानीनगरं प्राप्यमासमति ष्ठत्। स. व्या. पु.।

२ पादपद्मैः पवित्रां। वा. पु.।

३ परमपुरुषं। तै. पु.।

४ शिरसाभिवाद्य। वा. पु.। स. पु.। का. पु.।

५ मतमपीतिकच्चित् भागवती। वा. पु.।

६ प्रपञ्चमूलकारणगुणातीतलसद्वृत्तिश्च। वा. पु.।

लोकत्रयातीतवृत्तेः ज्ञानोन्नतेश्च (१) दृष्टत्वात् तेषां मुक्तिः करस्थैव। तस्माच्च तदाचारशीलवतां नः जीवद्दशायामपि मुक्तिरेव।

यदि नो पश्चिमं जन्म यदि वा शङ्करः स्वयं।
तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाचरी॥ इति॥

देव्यागमवचनस्य सत्यत्वात् (२) अतो विद्यावतां नः किञ्चिद्विचारणीयं। भवन्तोपि सर्व्वं परित्यज्य विद्योपासका भवथेति प्राप्ते श्रीमदाचार्य्यः पठति।

भोः पूर्णाभिषिक्त भवन्मतमसत्यं। कथमनित्यत्वात् तथा हि श्रुतिः यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येदित्यादिना सिद्धज्ञानिनः पुरुषस्य आत्मातिरेकादर्शनात्। तदानीं विमर्शः कुत्र कल्पनीयः। ईषदपि तदतिरेके जगदभावात् जगत्सत्यत्वे हेतुः प्रकृतिः जगदभावे किं प्रकृत्यभावः शङ्कनीयः। अनित्यप्रकृतिज्ञानेन किं फलं अत्र च तस्याः बहुरूपतोक्ता इन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुत्या गुणमयी गुणकारणञ्च सा भवति। अतो नित्यायाः प्रकृतेरुपासनापेक्षया सत्यादिलक्षणलक्षितस्य परमात्मनो विशेषज्ञानेन मुक्तिदर्शनात्। स एक एव सर्व्वैर्मुमुक्षुभिरुपासनीयः तस्य सत्यसङ्कल्पत्वादिच्छामात्रेणैव महदादिजगदुत्पत्तिका-

---

१ ज्ञानोन्नतस्य च इति। ल. पु.। का. पु.। ज्ञानस्य चेति
ते. पु.।

२ सत्त्वात। तै. प।

एकोनत्रिंशं प्रकरणं ।

तस्माद्दायुदिशि प्रसिद्धमखिलैः शिष्यैः समेतः परः
प्राप प्रोद्यदिनाभमूर्त्तिरनुमल्लाख्यं हि सत्पट्टनं ।
स्थित्वा तत्र दिनैकविंशतिमशेषान् वीक्ष्य तत्राश्रितान्
किं विप्रा वदत प्रभातमुखकालेऽत्यमार्षोद्गतं ॥ (१)

जगद्गुरुभिराचार्य्यैरेवमुक्ताः पौराः किल नत्वेदमूचुः स्वामिन् मद्वंशप्रवृत्तेरागतमिदं लक्षणं यः परमेश्वरो मल्लासुरहरः प्रसिद्धो मल्लारिरिति लोके वर्त्तते तन्मूर्त्तिः किलात्रैवाविर्भूतजगदुत्पत्तिसम्पत्तिकारणं तामनुदिनं संपूज्य तद्वाहनरूपशुनकवेषभाषादियुक्ता वयं कण्ठधृतवराटिकामालिकाङ्काः शङ्काहीनाः त्रिकालनाद्यस्तुवादिभिर्मल्लारिं प्रीतं कृत्वा वसामः तत्कटाक्षजनितानुदिनवर्द्धमानानन्दपरवशाः सर्व्वजगन्मल्लारिगर्भकोटरान्तर्गतमितिध्यानासक्तास्तदतिरिक्तं किञ्चिदपि नेच्छामः तस्यैव सर्व्वात्मकत्वाच्च । किञ्च वेदेषु मल्ला-

१ किं विप्रा वदत प्रभातमुखकाले क्रुद्धमार्गद्गतं । तै. पु. ।

ग्रहगतिरपि षोढा पूर्वापरा उदग्याम्या ऊर्द्ध्वाधरा चेति कश्चिद्विशेषोऽत्रावगन्तव्यः। सूर्यः किल जननसदृशात् सृष्ट्यादिकाला जाताः, शश्वत् प्रागदिशञ्चरतोः सूर्यचन्द्रयोर्दर्शान्ते सङ्गमः सम्भवति। तस्मात् शीघ्रगत्या पुरोगते चन्द्रे भानौ पृष्ठस्थे द्वादशांशमितं यदा भवति तावत् प्रतिपदुत्पद्यते। चतुर्विंशत्यंशान्तरे द्वितीयेत्याद्युत्पत्तिरित्येवमन्यासां तिथीनां ज्ञातव्यम्। चन्द्रादेव नक्षत्रं तयोर्योगाद्योगसिद्ध्यर्थं करणमेवं पञ्चाङ्गोपपत्तिः। ग्रहपतिचलनादेव लोकान्धकारनिवृत्त्यर्थं भगवति केचित् शिशुमारे ग्रहस्थानं वदन्ति, तदनर्हमिति भवदुक्तं तदेव ग्राह्यं भवति। कुतः, पुराणप्रमाणस्य विद्यमानत्वात्। सर्वज्ञैर्व्यासैः किमन्यथा प्रतिपादितम्। शिशुमारं किल स्वस्तिकमध्यनीलवदनेन गृहीत्वा निजाङ्गेन ब्रह्माण्डमाक्रम्य कालचक्रं स्वपृष्ठाधारेण भ्रमयन् तदन्यमुखेन याम्यध्रुवकीलं गृह्णाति। मुखाभ्यामष्टाचरतेजोरूपेणोन्मिषं तद्बलादधःप्रवेशाधारं महाकूर्मेण धृत्वा वर्त्तते इति कालभयेन ग्रहाभ्रमन्तीत्युक्तम्, न तथा वक्तव्यम्, श्रुतिविरोधात्। तथाहि

"भीषास्माद्वातः पवते भीषोदेति सूर्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः" ॥

इति उपक्रम्य जगदुपादानकारणं विवचितम्, अन्तेन ग्रन्थेन "स एको ब्रह्मण आनन्दः" इति। अतो 'अस्मात्' ब्रह्मण एव, 'भीषा'

'रंहति' प्राप्नोति, अप्छब्दग्रहणसामर्थ्यात्। तत्र कथं सामान्येन प्रतिज्ञाय सर्वैर्भूतसूक्ष्मैः सम्परिष्वक्तो रंहति, इति यदुच्येत, तत्रैवमुत्तरं, सूत्रमेव त्र्यात्मकत्वात् भूयस्त्वात्तत्, तुशब्देन चोदितामाशङ्कामुच्छिनत्ति, "त्र्यात्मकत्वाप्त्त्रिवृत्करणश्रुतेः। तास्त्वारम्भिकास्त्वभ्युपगम्यमानाः स्वेतरदपि भूतद्वयमवश्यमभ्युपगन्तव्यम्, त्र्यात्मकश्च देहस्त्रयाणां तेजोऽबन्नानां* तदस्मिन् कार्योपलब्धेः पुनश्च त्र्यात्मकः त्रिधातुत्वात्, त्रिभिर्वातपित्तश्लेष्मभिर्न सम्भूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरारम्भः शक्यते, तस्मात् भूयस्त्वापेक्षायामापः पुरुषवचस इति प्रश्नप्रतिवचनयोरप्छब्दो न कैवल्यापेक्षः। सर्वदेहेषु रसलोहितादिवस्तु दृश्यते, पार्थिवो धातुर्भूयिष्ठो देहिषूपलक्ष्यते, इति यदुच्येत, नैष दोषः। इतरापेक्षया अपां बाहुल्यं भविष्यति। दृश्यते च शुक्रशोणितलक्षणेऽपि देहबीजे द्रवबाहुल्यं, कर्म च निमित्तकारणं देहारम्भे, कर्माणि चाग्निहोत्रादीनि, सोमाज्यपयःप्रभृतिद्रवद्रव्याश्रयाणि कर्माणि, कर्मसमवायस्य चापः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाग्नौ हूयन्त इति वक्ष्यते। तस्मादप्यपां बाहुल्यप्रसिद्धिः। बाहुल्यादप्यप्छब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम्। सूत्रान्तरं, "प्राणगतेश्च प्राणानां देहान्तरप्रतिपत्तौ गतिः"। श्रूयते "तमुत्क्रामन्तं प्राणो-

---

* त्रयाणामप्तेजोवायूनामिति क्वचित्पाठः।

